# ॥ श्रीगणाधिप पञ्चरत्नम् ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम शृङ्गगिरि श्री श्री सच्चिदानन्द शिवाभिनव नृसिंहभारती महास्वामिभिः अनुगृहीतम् ॥

सरागलोकदुर्लभं विरागिलोकपूजितम्
सुरासुरैर्नमस्कृतं जरापमृत्युनाशकम् ।
गिरा गुरुं श्रिया हरिं जयन्ति यत्पदार्चका
नमामि तं गणाधिपं कृपापयःपयोनिधिम् ॥१ ॥

गिरीन्द्रजामुखाम्बुजप्रमोददानभास्करम्
करीन्द्रवक्त्रमानताघसङ्घवारणोद्यतम् ।
सरीसृपेशबद्धकुक्षिमाश्रयामि सन्ततम्
शरीरकान्तिनिर्जिताब्जबन्धुबालसन्ततिम् ॥२ ॥

शुकादिमौनिवन्दितं गकारवाच्यमक्षरम्
प्रकाममिष्टदायिनं सकामनम्रपङ्क्तये ।
चकासतं चतुर्भुजैः विकासिपद्मपूजितम्
प्रकाशितात्मतत्त्वकं नमाम्यहं गणाधिपम् ॥३ ॥

नराधिपत्वदायकं स्वरादिलोकनायकम्
ज्वरादिरोगवारकं निराकृतासुरव्रजम् ।
कराम्बुजोल्लसत्सृणिं विकारशून्यमानसैः
हृदा सदा विभावितं मुदा नमामि विघ्नपम् ॥४ ॥

श्रमापनोदनक्षमं समाहितान्तरात्मनाम्
सुमादिभिः सदार्चितं क्षमानिधिं गणाधिपम् ।
रमाधवादिपूजितं यमान्तकात्मसम्भवम्
शमादिषड्गुणप्रदं नमाम्यहं विभूतये ॥५ ॥

गणाधिपस्य पञ्चकं नृणामभीष्टदायकम्
प्रणामपूर्वकं जनाः पठन्ति ये मुदा युताः ।
भवन्ति ते विदां पुरः प्रगीतवैभवा जवा
च्चिरायुषोऽधिकश्रियः सुसूनवो न संशयः ॥६ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]